From Harivamśa section of Kṣemendra's Bhārata Mañjari

## व्यासाष्टकस्तोत्रम्

नमो ज्ञानानलशिखा पुञ्जपिङ्गजटाभृते ।
कृष्णायाकृष्णमहसे कृष्णद्वैपायनाय ते ॥ १
नमस्तेजोमयश्मश्रुप्रभाशबलितत्विषे ।
वक्त्र वागीश्वरीपद्म रजसेवोदितश्रिये ॥ २
नमः संध्यासमाधाननिष्पीतरवितेजसे ।
त्रैलोक्य तिमिरोच्छेद दीपप्रतिमचक्षुषे ॥ ३
नमः सहस्रशाखाय धर्मोपवनशाखिने ।
सत्त्वप्रतिष्टा पुष्पाय निर्वाणफलशालिने ॥ ४
नमः कृष्णाजिनजुषे बोधनन्दनवासिने ।
व्याम्नायेवाळिजालेन पुण्यसौरभलिप्सया ॥ ५
नमः शशिकलाकार ब्रह्मसूत्रांशुशोभिने ।
श्रिताय हम्सकान्त्येव संपर्कार्कमलौकसः ॥ ६
नमो विद्यानदीपूर्णशास्त्राब्धिसकलेन्दवे ।
पीयूषरससाराय कविव्यापारवेधसे ॥ ७
नमः सत्यनिवासाय स्वविकाशविलासिने ।
व्यासाय धाम्ने तपसां संसारायासहारिणे ॥ ८